# वैदिकवाङ्मये चैतन्यस्यावधारणा

डा. वीरेन्द्र कुमार मिश्रः

चित्शब्दात् ल्युट्प्रत्ययेकृते चेतनशब्दस्योत्प्रत्तिर्भवति । पुनश्च चेतनशब्दात् ष्यञ् प्रत्यये कृते चैतन्यशब्दस्योत्पत्तिर्भवति । अस्यार्थः परमात्मा, सर्वासां संवेदनानामादिस्रोतः[३] ।

निखिलेऽपिब्रह्माण्डे सर्वत्र चैतन्यस्य सत्ता एव प्रतिभाति । सर्वं चैतन्येनाधिष्ठितम्। उक्तं हि ऋग्वेदे यत् एकादशभिः रूद्रैः अहमेव चरामि, अष्टाभिः वसुभिः अहमेव चरामि, द्वादशादित्यैः अहमेव चरामि अपि च विश्वदेवैः अहमेव चरामि । मित्रावरुणौ उभौ अहमेव धारयामि । इन्द्राग्नी अप्यहमेव धारयामि । अहमेव धारयामि अश्विनौ। यथा -

अहं रुद्रेभिर्वसुभिश्चराम्यहमादित्यैरुत विश्वदेवैः ।

अहं मित्रावरुणोभा बिभर्म्यहमिन्द्राग्नी अहमश्विनोभा[४] ।। पुरुषसूक्तेऽपि उल्लिखितम् यथा - सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ।

सभूमिं विश्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ।।[५]

मन्त्रेऽस्मिन् परमेश्वरस्योल्लेखः प्राप्यते । सम्पूर्णसृष्टिरूपो विराडाख्यो यः पुरुषः परमात्मा सोऽयं सहस्रशिरोभिः युक्तः । सहस्रशब्दस्यात्र आशयोऽनन्तशिरोभिः युक्तः। सर्वेषाम् प्राणिनां यानि शिरांसि तानि सर्वाणि तस्य परमेश्वरस्यैव शिरांसि । सहस्राक्षीणि, सहस्रपादाः अपि परमेश्वरस्यैव सन्ति । सः पुरुषः (परमात्मा) निखिलब्रह्माण्डदेशमतिक्रम्य व्यवस्थितः । ब्रह्माण्डात् बहिरपि सर्वतो व्याप्तोऽस्ति ।

सर्वत्र परमेश्वरस्यास्तित्वमस्त्येव । विना चैतन्यं परमेश्वरं अस्य जगतः सत्ता न स्थास्यति । चैतन्यमेव परमात्मनः स्वरूपम् । ऋग्वेदे उल्लिखितं यथा -

पुरुष एवेदं सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥[६]

यदिदं वर्तमानं जगत् दृश्यते तत्सर्तं विराडाख्य पुरुषः एव । यच्च अतीतं जगत् यच्च भविष्यज्जगत् तदपि पुरुषरूपपरमात्मा एव । यथास्मिन् काले स्थितानिप्राणिशरीराणि तानि सर्वाणि विराट्पुरुषस्यावयवाः सन्ति तथैवातीतागामिनोरपि ।

सृष्टेरादौ न असत् आसीत् न सत् आसीत् । न लोकाः आसन् न आकाशः आसीत्। न गतिः आसीत् न स्थानमासीत् । न जन्म आसीत् न मृत्युरासीत् अमृतञ्च नासीत् । न दिवसः आसीत् न रात्रिः । सैव सर्व सामर्थ्यसम्पन्नः परमेश्वरः शान्तस्वरूपेणावस्थितः आसीत्। यथा -

नासदासीन्नो सदासीत् तदानीं नासीद्रजो नो व्योमा परो यत् ।
किमावरीवः कुह कस्य शर्मन्नम्भः किमासीद्गहनं गभीरम् ॥[७]
न मृत्युरासीदमृतं न तर्हि रात्र्या अह्न आसीत् प्रकेतः ।
आनीदवातं स्वधया तदेकंतस्माद्धान्यन्न परः किं चनास ॥[८]

शान्तस्वरूपे स्थिते परमेश्वरे कामनायाः प्रादुर्भावोऽभवत् सोऽकामयत बहु प्रजाप्रजायेयेति एकोऽहं बहुस्यामिति । तदापरमात्मनः सृष्टिरभवत् । उपनिषद्वाक्यमस्ति "तत् सृष्ट्वा तदेवानु प्राविशत् ".[९] इमां सृष्टिं निर्माय स्वयमेव प्रविश्य तत्रैव स्थितोस्ति। पुरूषसूक्तेऽपि उल्लिखितमस्ति यत् इयं सृष्टिः समग्र जगदस्य परमेश्वरस्य एकैव पादः अर्थात् चतुर्थोऽशः ।

यथा - "पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि" ॥[१०]
त्रिपादूर्ध्व उदैत् पुरुषः पादोऽस्येहाभवत् पुनः ।[११]

एवं समग्रेयं सृष्टिः चैतन्यस्वरूपपरमेश्वरस्यैव । अस्मात् विराट् पुरुषादेव सूर्यचन्द्रान्तरिक्षद्युपृथिव्यादीनां लोकलोकान्तराणामुत्पत्तिरभवत् । यथा

चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत ।[१२]

नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत ।

पद्भ्यां भूमिर्दिशः श्रोत्रात् तथा लोकाँ अकल्पयन्[१३]

पृथिवीमुपरि पशुपक्षिमानवपर्वतनद्यादीनां निर्मितिः तस्यैवास्ति ।

यथा – पशून् ताँश्चक्रे वायव्यानारण्यान् ग्राम्याश्च ये ।[१४]

तस्मादश्वा अजायन्त ये के चोभयादतः ।

गावो ह जज्ञिरे तस्मात् तस्माज्जाता अजावयः ॥[१५]

ब्राह्मणोऽस्य मुखमासी द्बाहू राजन्यः कृतः ।

ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत ॥[१६]

यस्येमे हिमवन्तो महित्वा यस्य समुद्रं रसया सहाहुः ।

यस्येमाः प्रदिशो यस्य बाहू कस्मै देवाय हविषा विधेम ॥

इमे हिमवन्तः पर्वताः यस्य प्रजापतेः महत्त्वं माहात्म्यमैश्वर्यं कथयन्ति । नदीभिः सह समुद्रः यस्य परमात्मनः महत्त्वं प्रतिपादयति । यस्य इमाः प्रदिशः भुजवत्प्राधान्ययुक्तः प्रदिशः ऐश्वर्यं प्रतिपादयन्ति ।

परमेश्वरादेव आकाशस्योत्पत्तिरभवत् । आकाशाद् वायुः, वायोरग्निः, अग्नेः जलं, अद्भ्यः पृथिव्याः उत्पत्तिरभवत् । पृथिव्याः नानाविधौषधयः, ओषधीभ्योऽन्नमन्नान्मनुष्यः उत्पन्नः ।[१७]

इत्थमिदं स्पष्टं यदिदं जगत्सर्वं तत्सर्वं परमेश्वरादेव प्रादुर्भूतम् । अस्य स्थावरजङ्गमात्मकस्य जगतः स्थितिः तावदेव भवति यावत् जीवनं चैतन्येन अधिष्ठितं भवति। इत्थं चैतन्यस्य प्राणस्वरूपत्वमपि अस्ति । प्राणशब्दस्योत्पत्तिः प्र उपसर्गपूर्वकं अन् धातोः अच् घञ् वा प्रत्यये कृते भवति। प्राणशब्दस्यार्थः श्वासः, जीवनशक्तिः, आयुः, जीवनस्य मूलतत्त्वञ्च ।[१८]

सर्वं जगदिदं प्राणमयमस्ति। अथर्ववेदे एकस्मिन्मन्त्रे उल्लेखोऽस्ति यत् प्राणस्याधीनं जगत्सर्वम् तस्मै प्राणाय नमः । प्राणः सर्वेषामीश्वरोभवति । इदं सर्वं प्राणे एव

प्रतिष्ठितम्। यथा -

नमो प्राणाय यस्य सर्वमिदं वशे। यो भूतः सर्वस्येश्वरो यस्मिन्सर्वं प्रतिष्ठितम्॥[१९]

देवगणाः प्राणस्यानुगामिनो भूत्वा श्वसनकियां सम्पादमन्ति । मानवाः पशवश्च प्राणनक्रियया सचेष्टाः भवन्ति । प्राणः एव सर्वेषां जीवानामायुः । एवं प्राणः सर्वायुषं कथ्यते। यथा - "प्राणं देवा अनुप्राणन्ति । मनुष्याः पशवश्च ये। प्राणो हि भूतानामायुः। तस्मात्सर्वायुषमुच्यते" ।[२०]

प्राणैः सर्वाः ओषधयः तेजस्विनः भवन्ति, गर्भं धारयन्ति, विविधतया उत्पद्यन्ते प्रसरन्ति च । यथा - यत् प्राण स्तनयित्नुनाभिक्रन्दत्योषधीः ।

प्र वीयन्ते गर्भान् दधतेऽथोबह्वीर्विजायन्ते ॥[२१]

प्राणैः ओषधीनामायुः वर्धते । सुगन्धिमपि प्राणैरेव प्राप्नुवन्ति ।

यथा - अभिवृष्टा ओषधयः प्राणेन समवादिन् ।
आयुर्वै नः प्रातीतरः सर्वा नः सुरभीरकः ॥[२२]

अर्थात् ओषधिमुपरि जलवर्षानन्तरं जलेनाभिसिक्ताः ओषधयः प्राणेन सह सम्भाषयन्ति। भो प्राण ! त्वया अस्माकमायुः प्रवर्धितः । सुगन्धियुक्तमपि कृतम्।

प्राणः मृत्युरस्ति सः एव जीवनशक्तिः । देवाः अपि प्राणोपासनां कुर्वन्ति । सत्यवादी प्राणः उत्तमं लोकं गच्छति । यथा -

प्राणो मृत्युः प्राणस्तक्मा प्राणं देवा उपासते ।
प्राणो ह सत्यवादिनमुत्तमे लोक आदधत् ॥[२३]

प्राणः तेजोभिर्युक्तः प्राणः एव सर्वेषाम् प्रेरकः । एतदर्थमेव सर्वैः प्राणः उपास्यते। सूर्यश्चन्द्रप्रजापतिश्च प्राणाः एव सन्ति ।[२४]

प्राणापानौ व्रीहियवौ स्तः । वृषभः एव प्राणोऽस्ति । प्राणः यवे प्रतिष्ठितः अपानः व्रीहिः कथ्यते । यथा -

प्राणापानौ व्रीहि यवावनड्वान् प्राण उच्यते ।
यवे ह प्राण आहितोऽपानो व्रीहिरुच्यते ॥[२५]

प्राणः मातरिश्वा, वायुः । अतीतमनागतं वर्तमानञ्च प्राणाः एव सन्ति । प्राणे सर्वं प्रतिष्ठितम् । यथा -

प्राणमाहुर्मातरिश्वानं वातो ह प्राण उच्यते ।
प्राणे ह भूतंभव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥[२६]

प्राणस्य प्रेरणया आथर्वणीः आङ्गिरसीः दैवीः मनुष्यकृता च ओषध्यः फलप्रदाः भवन्ति। यथा -

आथर्वणीराङ्गिरसीर्दैवीर्मनुष्यजा उत ।
ओषधयः प्रजायन्ते यदा त्वं प्राण जिन्वसि ॥[२७]

गर्भस्थजीवेषु प्राणापानक्रियां प्राणः एव सम्पादयति । प्राणस्य प्रेरणयैव जीवानामुत्पत्तिर्भवति । यथा -

अपानती प्राणति पुरुषो गर्भे अन्तरा ।
यदा त्वं प्राण जिन्वस्यथ संजायते पुनः ॥[२८]

प्राणस्य विषये ऐतेरेयारण्यके प्रतिप्रादितं यत् प्राणेनैव विश्वमिदं धार्यते । यथा प्राणस्यशक्त्या अयमाकाशः स्वस्थाने धार्यते तथा सर्वेषां प्रणिनाम् धारणं प्राणेनैवक्रियते । यथा -

"सोऽयमाकाशः प्राणेन बृहत्या विष्टब्धः तद्यथायमाकाशः प्राणेन बृहत्या विष्टब्धः। एवं सर्वाणि भूतानि आपिपीलिकाभ्यः प्राणेन बृहत्या विष्टब्धानीत्येवं-विद्यात् ।"[२९]

सर्वा ऋचः सर्वे वेदाः सर्वे घोषाव्याहृतिश्च प्राणः एवास्ति ।[३०] प्राणः एव अग्निः अस्ति । अन्नेनैव प्राणानामभिषेकः भवति । पशूनां प्राणोऽन्नमस्ति । प्राणः अन्नस्य रसोऽस्ति । प्राणोऽयमन्नरसमयो भवति । अन्नेनैव प्राणः धार्यते अन्यथा प्राणः शरीरं

त्यजति । यथा -

"प्राणोऽग्नि[३१] । प्राणो वा अन्नस्य रसः[३२] । अन्नमयो ह्यय प्राणः ।[३३]

प्राणाँश्वोत्सृजतीति ।[३४]"

प्राणस्य शक्तिः सूर्येऽस्ति । सैवशक्तिः द्युलोके प्रसरति । यदा वृष्ट्या सूर्यः पृथिव्या सह संयुज्यते तदा सूर्ये द्युलोके च सन्निहिता प्राणशक्तिः वृष्टिजलमाध्यमेन पृथिवीमागच्छति। यथा -

"जगता सिन्धुं दिव्यस्तभायद् रथन्तरे सूर्यं पर्यपश्यत् ।

गायत्रस्य समिधस्तिस्र आहुस्ततो मह्ना प्ररिरिचे महित्वा ॥"[३५]

शतपथब्राह्मणे प्राणस्यार्कस्वरूपत्वं मधुस्वरूपत्वञ्चोक्तम् ।[३६]

ननु यदा प्राणं सर्वमस्ति तदा अस्योत्पत्तिः कथमभवत् ? अस्य कतिप्रकाराः सन्ति? शरीरेऽयं कुत्र तिष्ठति ? अनेके प्रश्नाः उपस्थिताः भवन्ति ।

यथा स्थावरजङ्गमात्मकस्य जगतः उत्पत्तिः परमेश्वरादभवत् तथैव प्राणस्योत्पत्तिः परमेश्वरादेवाभवत् । मुण्डकोपनिषदि उल्लेखः प्राप्यते यदक्षरपुरुषात् प्राणः मनः, सर्वाणीन्द्रियाणि आकाशः, वायुः, ज्योतिः, जलं निखिलजगतः धारिणी पृथिवी चोत्पन्ना अभवत् ।[३७]

तस्मात्पुरुषात् सप्तप्राणाः (नेत्रद्वयं, श्रोत्रद्वयं, घ्राणद्वयं, एकारसना) उत्पन्नाः भवन्ति । सप्तेन्द्रियाणां सप्तवृत्तयः स्व एव विषयान् प्रकाशयन्ति । इमान्सप्तप्राणान् परमात्मा विधाता सर्वेषां प्राणिनां शरीरे स्थापयति । यथा सप्त प्राणाः प्रभवन्ति तस्मात् सप्तार्चिषः समिधः सप्तहोमाः ।

सप्तइमे येषु चरन्ति प्राणा गुहाशया निहिताः सप्त सप्त ॥[३८]

"यथैषा पुरुषे छायैतस्मिन्नेतदाततं मनोकृतेनायात्यस्मिञ्शरीरे ।"[३९] अर्थात् यथा मानवशरीरात् छायायाः उत्पत्तिर्भवति तथैवास्मिनात्मनि प्राणस्य व्याप्तिरस्ति । मनसः सङ्कल्पेन शरीरे प्राणः आगच्छति। चैतन्यस्य प्रभावोऽपि अस्मिन् समये शरीरे

दृश्यते ।

प्राणशब्दस्य प्रयोगः इन्द्रियार्थेऽपि कृतः । छान्दोग्योपनिषदि संवर्गविद्यायाः उपदेशे रैक्वस्य कथनमस्ति यत् इमौ द्वावेव संवर्गौ स्तः । प्रथमो देवेषु वायुः द्वितीयः इन्द्रियेषु प्राणः ।[४०] अत्र प्राणः इन्द्रियार्थे ग्रहीतः । अस्यामुपनिषदि अपरस्मिन् स्थले उक्तं यत् प्राणः (इन्द्रियं) अहं श्रेष्ठोऽहं ग्रेष्ठोऽस्मि एवं विवादमकरोत्[४१] प्राणः इन्द्रियार्थे सत्यपि प्राणः प्रमुखो भवति ।

प्रश्नोपनिषदि[४२] एकाख्यायिकामाध्यमेन पस्तुतं यत् "विदर्भ देशीयभार्गवेन पिप्पलादमुनिःप्रष्टः यत् कति देवताः इमां प्रजां धारयन्ति ? केके देवाः प्रकाशयन्ति? के च तेषु सर्वश्रेष्ठाःसन्ति ? पिप्पलादमुनिरकथयत् - स : देवः आकाशः । वायुरग्निः जलं, पृथिवी, वाक् (सर्वाणि कर्मेन्द्रियाणि), मनः (अन्तकरणं), चक्षुः श्रोत्रश्च (सर्वाणिज्ञानेन्द्रियाणि) सर्वे देवाः सन्ति । सर्वे स्व महिमानं प्रकाशयन्तः कथयन्ति यत् अस्माकं सर्वेषामाश्रयः शरीरमेवास्ति । तस्मिन् समये एकदा सर्वश्रेष्ठः प्राणः तान् प्रत्यब्रवीत् - त्वं मोहम् मा गच्छ। अहं स्वयमेवात्मानं पञ्चधा विभज्य शरीरमिदं धारयामि । किन्तु ते तं प्रति विश्वासं न कृतवन्तः । एवम् प्राणः उत्क्रमितुमारब्धवान्। प्राणे उत्क्रममाणे तेसर्वे उत्क्रमितुमारब्धवन्तः। प्राणे स्थिते सर्वे स्थितवन्तः । एवं प्राणस्य प्राधान्यं सिद्धमभवत् । इत्थं प्राणः सर्वमभवत् । प्राणःस्वाग्निरुपे तपति । सूर्यः मेघः इन्द्रः वायुः, देवः, पृथिवी, रयिः सदसदमृतञ्च सर्वं प्राणः एव ।[४३]

एवं प्राणस्य श्रेष्ठत्वम् अन्योपनिषत्स्वपि सम्यकृतया प्रादिपादितम् ।[४४] अस्मिन्नेव सन्दर्भेपिप्पलादऋषिः प्राणं सम्राट्वत् कथितवान् । यथा कोऽपि राजा स्वाधिकारिजनान् पृथक् - पृथक् नियोजयति तथा प्रमुखः प्राणः अन्य प्राणान् (इन्द्रियाणि) पृथक्-पृथक्रूपेण तेषु तेषु स्थानेषु स्थापयति ।[४५]

प्राणः सर्वासु नाडीषु पृथक्पृथक्रुपेण सञ्चरति । प्राणापानव्यानोदानसमान-नाग-कूर्म-देवदत्त - कृकर - धनञ्जयादयः प्राणस्य विविधानिरुपाणि सन्ति । एषु प्राणस्य पञ्च प्रकाराः प्राणापानव्यानोदानसमानादयश्च प्रमुखाः सन्ति ।[४६] प्राणः

पायुपस्थयोः मध्ये अपानं नियोजयति । मुखनासिकाभ्यां बहिःआगच्छन् प्राणः चक्षुःग्रोत्रे स्वयमेव तिष्ठति । मध्ये समानः भवति । समानः वायुः भुक्तान्नं समभावेन शरीरे सर्वत्र प्रेषयति ।[४७]

व्यानः श्रोत्रे नेत्रे कण्ठे स्कन्धे जानौ तिष्ठति । उभयोः हस्तयोः पादयोः उदानवायुः सञ्चरति । नागादीनां पञ्चवायूनां सञ्चारः त्वगस्थ्नोः मध्ये भवति । शरीरस्य सर्वासां क्रियाणामाधारः प्राणःएवास्ति ।

प्रश्नोपनिषदि प्राणस्य स्तुतिं कुर्वता उक्तं यत् हे प्राण ! त्वमेव प्रजापतिः, त्वमेवगर्भे सञ्चरसि, त्वमेव जन्म गृह्णासि, त्वमेव सर्वैः इन्द्रियैः सह प्रतितिष्ठाति। त्वमेव देवेभ्यः वह्नितमः, त्वमेव पितृभ्यः स्वधा, अथर्वाङ्गिरस - ऋषिभ्यः सत्याचरणमसि ।[४८] प्राणः एवज्योतिर्गणस्याधिपतिः सूर्यः, सः एव अन्तरिक्षे - सञ्चारी ।[४९] इदं ब्रह्म एव प्राणः । आब्रह्मन् स्थावरपर्यन्तसर्वेषु भूतेषु भासतेऽयं प्राणः ।[५०] प्रलयकाले सर्वे प्राणिनः प्राणमेवाभिसंविशन्ति उत्पत्तिसमये प्राणादेवोत्पद्यन्ते ।[५१] एवं प्राणस्य ब्रह्मस्वरूपत्वमस्ति ।[५२] छान्दोग्योपनिषदि अन्यत्रोपलभ्यते यदयं प्राणः ब्रह्मणश्चतुर्थः पादोऽस्ति ।[५३]

महर्षियाज्ञवल्क्यः महाराजजनकमुपदिशन् कथयति - हे राजन् । प्राण एव ब्रह्म । यः एवं जानन् प्राणरूपब्रह्मणः उपासनां करोति प्राणाः तं परित्यजन्ति।[५४] बृहदारण्यकोपनिषदि प्राणस्वरूपब्रह्मणः अष्टौ भेदाः उल्लिखिताः । यथा - अमृतं, स्त्री, सत्यम्, दिशः, मृत्युः असुः, वरुणः, प्रजापतिः ।[५५]

प्राणस्य ब्रह्मस्वरूपत्वे सति शङ्काजायते यदि प्राणस्य ब्रह्मस्वरूपत्वमस्तितत्कथं ब्रह्मणः उत्पत्तिः सम्भवति ? ब्रह्मणः उत्पत्तिम्न न भवति न च मृत्युः । किन्तु प्राणस्योत्पत्तिरक्षर ब्रह्मणः भवति ।[५६] सन्दभऽस्मिन् प्रामाणिकमप्रामाणिकं किमस्ति ?

उपनिषत्सु ये ये विषयाः वर्णिताः तेषामप्रामाणिकत्वं न भवति । साक्षात्कर्तृणामृषीणां किमपि कथनमशुद्धमप्रामाणिकं निराधारं परस्परविरोधि

नास्ति । अस्माकमृषिभिः यथा दिव्यदृष्ट्या सूक्ष्मातिसूक्ष्म तत्त्वानां यत् प्रतिपादनं कृतं तदशुद्धमप्रामाणिकं परस्परविरोधि निराधारं कथमपि भवितुं न शक्यते ।

सूक्ष्म दृष्ट्योपनिषत्साहित्यस्याध्ययनेनैतादृशीनां भ्रान्तीनां सम्यक्तया निराकरणं भवति। उपनिषत्सु यस्य प्राणब्रह्मणः उल्लेखः प्राप्यते तद् हिरण्यगर्भवैश्वानरसंज्ञकं वा ब्रह्मास्ति। अस्य तथ्यस्य स्पष्टीकरणं कुर्वताचार्यशङ्करेणोक्तं "या सर्व देवतामयी सर्व देवतात्मिका प्राणेण हिरण्यगर्भरूपेण परस्माद्ब्रह्मणः सम्भवति ।[५७] अर्थत् यासर्वदेवतामयी सर्वदेवस्वरुपादितिः प्राणेन हिरण्यगर्भरूपेण परब्रह्मणः उत्पद्यते । पश्नोपनिषत्भाष्ये आचार्यशङ्करेण प्राणं हिरण्यगर्भनाम्नोक्तः - यथा "सः पुरुष उक्तप्रकारेणेक्षित्वा प्राणं हिरण्यगर्भाख्यं सर्व प्राणिकरणाधारम् अन्तरात्मानमसृजत सृष्टवान् ।"[५८] अर्थत् सह पुरुषः उक्त प्रकारेण दृष्ट्वा हिरण्यगर्भसंज्ञकं प्राणं सर्वेषां प्राणिनामाधाररुपमात्मानं निर्मितवान् । प्राणस्य वैश्वानरस्वरूपत्वमपि भवति । सोऽयं (भोक्ता) वैश्वानरः विश्वरूपाग्निरेव प्रादुर्भवति।[५९]

इत्थं प्राणः प्रजापति - हिरण्यगर्भ - वैश्वानररूपेणास्ति । एताति सर्वाणि रुणाणि ब्रह्मणि ब्रह्मणः एव सन्ति । अनेनैव कारणेन प्राणः सृष्टिकर्ता, पालनकर्ता, संहारकर्ता ब्रह्मवत् कल्पितः । एवं प्राणस्य विषये एतादृशं कथनं तस्य ब्रह्मणः रूपे प्रतिपादनं प्राणस्य महिमानं प्रतिपादयति । प्रश्नोपनिषदि प्राणस्य महिमानं प्रतिपादयता कथितं यदस्मिन्लोके स्वर्गे च या उपभोगस्य सामग्री प्राप्यते सा प्राणाधीनास्ति । माता यथा पुत्रान् रक्षति तथैव त्वं मां रक्ष । ब्राह्मणक्षत्रिययोश्च विभूतयः प्रज्ञाश्चापि तवाधीनाः सन्ति । ताः विभूतिः प्रज्ञाश्च मह्यं देहि ।[६०]

प्राणरूपब्रह्मणः उपासनाफलमप्युक्तमुपनिषत्सु । बृहदारण्यकोपनिषदि उल्लिखितमस्ति यत् हे सम्राट् । प्राण एव परब्रह्म । ये एवं विधं ज्ञात्वोपासते प्राणः तान्न परित्यजति ।[६१] प्राणरूपौङ्कारब्रह्मोपासकः कामनाभिः पूर्णो भवति।[६२] प्राणोपासको यो विद्वान् प्राणं जानाति तस्य प्रजा विनाशं न प्राप्नोति ।[६३] प्राणोपासकः पूर्णायुष्यं प्राप्नोति ।

प्राणतत्त्वस्य विषये सत्यकाम जाबालिः वैयाघ्रपद्यगोश्रुतिमकथयत् यदि शुष्कं स्थाणुं प्रति प्राणदर्शनस्यास्य कथनं भवतु तत्तु तस्मिन् स्थाणौ प्राणसञ्चारः भविष्यति, शाखापलाशपत्रादीनामुत्पत्तिर्भविष्यति ।[६४] जीवित पुरुषाय किं कथनं स्यात् ?

प्राणोपसनया सत्यनिष्ठपुरुषस्य योग्यता वर्धते । प्राणस्य स्थैर्येण मनः शान्तं भवति, एकाग्रता आयाति । प्राणस्य चाञ्चल्येनैकाग्रता नश्यति मनः अशान्तिं प्राप्नोति। देवताः अपि प्राणमुपासाते । प्राणः सत्यवादिनं पुरुषं उत्तमान् लोकान् गमयति । भूतभव्यवर्तमानकालीनाः सर्वेपदार्थाः प्राणे एव तिष्ठन्ति । प्राणे एव सर्वं प्रतिष्ठितं भवति । यथा -

प्राणं देवा उपासते । प्राणो ह सत्यवादिनमुत्तमे लोक आदधत् ॥[६५]
प्राणो ह भूतं भव्यं च प्राणे सर्वं प्रतिष्ठितम् ॥[६६]

प्राणः अन्नेन सह सम्बध्यते । अन्नेन प्राणं वर्धस्व । यथा - "प्राणमन्नेनाप्यायस्व ।"[६७] अन्नेन प्राणस्य शक्तिर्वर्धते । अन्नेनात्र सात्त्विकमन्नं विवक्षितम् । समुचितान्नभक्षणेनायुष्यस्य वर्धनं भवति । अनुचितान्नं पदार्थं वा जघ्वामान्त्रणं कुर्वन्ति रोगाणांजनाः । एवं प्राणोपासकाः समुचितसात्त्विकान्नं भक्षयन्ति । इत्थं रक्षितः प्राणः सर्वं कम्पमानं रक्षति । यथा - "प्राणो रक्षति विश्वमेजत् ।"[६८] प्राणशक्तिः सर्वासां शक्तीनां श्रेष्ठतमा शक्तिरस्ति । यजुर्वेदे उल्लेखः प्राप्यते यत् - यज्ञेनास्माकं प्राणः वर्धताम्। यथा - "प्राणो यज्ञेन कल्पताम्।"[६९] प्राणो हविस्वरूपमस्ति यथा - "प्राणो हविः ।"[७०]

तावत्कालपर्यन्तं हि आयुर्भवति यावत्कालपर्यन्तं प्राणाः प्राणिनां शरीरे निवसन्ति । इत्थं प्राणः आयुष्यश्च समानमर्थं प्रतिपादयतः । प्राणिनामायुः प्राणएवास्ति । यथा - प्राणोहिभूतानामायुः ।[७१]

प्राणस्य प्रेरकः कः केन नियुक्तः प्राणः चलति । यथा - केन प्राणः प्रथमः प्रैति युक्तः ।[७२] अस्य प्रश्नस्योत्तरे प्रश्नोपनिषदि उल्लेखोऽस्ति । यथा - स उ प्राणस्य-प्राणः ।[७३] आत्मा प्राणस्य प्राणोस्ति आत्मैव प्राणस्य प्रेरको भवति । यस्य जीवनं प्राणेन न भव त्यपितु येत प्राणस्य जीवनं भवति तद् ब्रह्मआत्मास्ति । यथा -

यत्प्राणेन न प्राणिति येन प्राणः प्रणीयते ।
तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते ॥[७४]

आत्मनः शक्त्या प्राणः स्वकार्यं करोति । योऽयं प्राणस्यान्तःस्थितः पुरुषोऽहमेवास्मि ।[७५] अहमात्मास्मि । मां परितः प्राणः उपस्थितोस्ति । बृहदारण्यकोपनिषद्यपि एषः भावः प्रतिपादितः ।[७६]

आत्मनः इच्छाशक्त्या नासिकायां छिद्रद्वयमभवत् । ततः प्राणोऽभवत् । प्राणाद् वायुरभवत् । यथा - नासिके निरभिध्येतां नासिकाभ्यां प्राणः प्राणाद्वायुः ।[७७] ऐतरेयोपनिषदि[७८] एवापरस्मिन् स्थाने उल्लेखोऽस्ति यत् - वायुः प्राणो भूत्वा नासिकायाः रन्ध्रद्वयं प्रविष्टवान् ।

प्राणः रं भवति यतः सर्वाणि भूतानि प्राणे रमन्ते ।[७९] प्राणः उक्थं यतः प्राणः सर्वानुत्थापयति ।[८०] प्राणः यजुरस्ति यतः प्राणे इमे सर्वे प्राणिनः संयुज्यन्ते ।[८१] प्राणः सामरूपोऽस्ति प्राणे हि सर्वाणि भूतानि सम्यक्रीत्या तिष्ठन्ति ।[८२] प्राणः क्षत्रमस्ति यतः प्राणः एव क्षतात् व्यष्टात् त्रायते ।[८३] अत्र प्रत्येकं मुख्यः शब्दः प्राणस्य शक्तिं प्रतिपादयति ।

न केवलं प्राणिनां शरीरे एव प्राणसञ्चारेण जीवनं दृश्यते अपितु अङ्गेष्वपि प्राणसंचारेणैव जीवनं भवति । यस्मिन्नवयवे प्राणस्य गमनागमनं नानुभूयते सोऽवयवःकार्यसम्पादनायासमर्थो भवति, शून्योभवति । एवम् प्राणः शरीरावयवानां कृते जीवनाधारभूतो रसोऽस्ति । बृहदारण्यकोपनिषदि अस्यवर्णनमुपलभ्यते यथा -

आङ्गिरसोऽङ्गानां हि रसः प्राणो या अङ्कानां रसः प्राणो हि वा अङ्गानां रसस्तस्माद्यस्मात्कस्माच्चाङ्गात्प्राण उत्क्रमति तदेव तच्छुष्यत्येष हि वा अङ्गानां रसः ।[८४]

प्राणः एवाङ्गानां रसः । यस्मादङ्गात् प्राणः निष्क्रामति तदङ्गं शुष्यति नीरसं भवति। इयं स्थितिः न केवलं प्राणिनां शरीरस्यास्ति । वृक्षाणामप्येतादृश्येव स्थितिः भवति । वृक्षाणामपि यस्मिन् भागे प्राणरूपो रसो न विद्यते सः भागोऽपिशुष्यति ।

आत्मनः इच्छाशक्त्यैव प्राणः शरीरस्य सर्वेष्वङ्गेषु प्राणस्वरूपं रसं सञ्चारयति ।

आत्मनः प्रेरणा प्राणो भवति । प्राणेन मनः संयुज्यते । मनसेच्छाशक्तिः विनियम्यते । इच्छाशक्त्या रक्ते परिणामो भवति तदनन्तरमेव सर्वस्मिन् शरीरेऽभीष्टकार्यं भवति । यथा -

पुरुषस्य प्रयतो वाङ्मनसि संपद्यते, मनः प्राणे, प्राणस्तेजसि, तेजः परस्यां देवतायाम् ।[८५]

पुरुषस्य वाङ्मनासि मनः प्राणे, प्राणः तेजसि, तेजः परस्यां देवतायाम् अर्थात् आत्मनि प्रशाम्याति ।

यदा प्राणः स्वपिति तदा वाङ्मनश्चक्षुःश्रोत्रादीनि सर्वाणि प्राणमेव गच्छन्ति । यथा - प्राणो वाव संवर्गः । स यदा स्वपिति प्राणमेव वागप्येति, प्राणं चक्षुः, प्राणं श्रोत्रं, प्राणं मनः, प्राणो ह्येवैतान् संवृक्त इति ।[८६]

यथा सूर्योदयकाले सूर्यस्य रश्मयः प्रसरन्ति अस्तङ्गते च तस्य रश्मयस्तस्मिन्नेव प्रलीयन्ते । एवमेव यदा प्राणः जागर्ति तदा तस्य रश्मयः इन्द्रियादिषु प्रसरन्ति । प्राणस्य निद्राकाले प्राणमेव समाविशन्ति । एतादृशीस्थितिः अस्ति प्राणस्य । प्राणं विनाजगतः अस्तित्वं न स्थास्यति ।

इत्थं प्राणः ब्रह्मस्वरुपात्मकमस्ति । निखिल स्थावरजङ्गमात्मकजगति यज्जीवनं संदृश्यते तत्सर्वं चैतन्येनैवाधिष्ठितम् । चैतन्यरूपप्राणब्रह्मणा जीवनं प्रदाय तस्य सञ्चालनं क्रियते। अखिलेऽपि ब्रह्माण्डे पर ब्रह्मणःशक्तिं विना किञ्चिदपि भवितुं न शक्यते । सर्वत्र तस्यैव सत्तायाः दर्शनं भवति । सत्यमेवोक्तम् यथा -

न तत्र सूयो भाति न चन्द्रतारकं
नेमा विद्युतो भान्ति कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं
तस्य भासा सर्वमिदं विभाति ॥[८७]

१. आत्मा, जीवः, ब्रह्म, परमात्मा । वी.एस. आप्टे - संस्कृत-हिन्दी कोशः तृतीयसंस्करणम् - १९७३, पृ.सं. ३८०

२. सजीवः, आत्मा, परमात्मा । वी.एस. आप्टे - संस्कृत-हिन्दी कोशः
१९७३, पृष्ठसं. - ३८६

३. वी.एस. आप्टे - संस्कृत-हिन्दी कोशः पृ.सं. ३८७, १९७३

४. ऋग्वेदः १०.१२५.१; यच्च किञ्चिज्जगत्सर्वं दृश्यते श्रूयते वा ।

५. ऋग्वेदः १०.९०.१ अन्तर्बहिश्च तत्सर्वं व्याप्य नारायणः स्थितः ।
तैत्तिरीयारण्यकम् - १०.१३.५
यजुर्वेदः ३१.१

६. ऋग्वेद : १०.९०.२; यजुर्वेदः ३१.२

७. ऋग्वेद : १०.१२९.१

८. ऋग्वेद : १०.१२९.२

९. तैत्तिरीयोपनिषद् - ३.६

१०. ऋग्वेदः - १०.९०.३; यजुर्वेदः ३१.३

११. ऋग्वेदः - १०.९०.४; यजुर्वेदः ३१.४

१२. ऋग्वेदः - १०.९०.१३; यजुर्वेदः ३१.१२; "सूर्याचन्द्रमसौ धाता
ऋग्वेदः - १०.९०.१४; यजुर्वेदः ३१.१३ यथा - पूर्वमकल्पयत्
दिवं च पृथिवीं च
१४. ऋग्वेदः - १०.९०.०; यजुर्वेदः ३१.६ अन्तरिक्षमथो स्वः।"

१५. ऋग्वेदः - १०.९०.१०; यजुर्वेदः ३१.८, महानारायणोपनिषद् ५.७

१६. ऋग्वेदः - १०.९०.१२; यजुर्वेद ३१.११

१७. तस्माद्वा एतस्मादात्मनः आकाशः सम्भूतः आकाशाद्वायुः । वायोरग्निः । अग्नेरापः । अद्भ्यः पृथिवी । पृथिव्या ओषधयः । ओषधीभ्यो ऽन्नम् । अन्नात् पुरुषः । स वा एष पुरुषोऽन्नरसमयः । तैत्तिरीय-आरण्यकम् ८.२.३ तैत्तिरीयोपनिषत् २.१
अन्नाद्वै प्रजाः प्रजायन्ते । ...... अथो अन्नेनैव जीवन्ति । .... अन्नँहि भूतानां ज्येष्ठम् । तस्मात्सर्वौषधमुच्यते । तैत्तिरीयारण्यकम् ८.२.१

१८. वी. एस. आप्टे - संस्कृत-हिन्दी कोशः पृष्ठसंख्या ६८७, तृतीय संस्करणम् १९७३, मोतीलालबनारसीदासः दिल्ली ।

१९. अथर्ववेदः ११.४.१

२०. तैत्तिरीयारण्यकम् ८.३.१, तैत्तिरीयोपनिषद् - २.३

२१. अथर्ववेदः - ११.४.३

२२. अथर्ववेदः - ११.४.६

२३. अथर्ववेदः - ११.४.१

२४. प्राणोविराट् प्राणो देष्ट्री प्राणं सर्व प्राणः उपासते ।
प्राणो ह सूर्यश्चन्द्रमाः प्राणमाहुः प्रजापति ॥ अथर्ववेदः ११.४.१२

२५. अथर्ववेदः - ११.४.१२

२६. अथर्ववेदः - ११.४.१५

२७. अथर्ववेदः - ११.४.१६

२८. अथर्ववेदः - ११.४.१४

२९. ऐतरेय आरण्यकम् - २.१.६

३०. सर्वात्रृचः, सर्वे वेदाः, सर्वे घोषा, एकैव व्याहृतिः प्राणः एव प्राण ऋच
इत्येव विद्यात् । मैत्रायणी आरण्यकम् - २.२.१०

३१. मैत्रायणी आरण्यकम् - ६.९

३२. मैत्रायणी आरण्यकम् ६.१३

३३. मैत्रायणी आरण्यकम् ६.११

३४. तदेव

३५. ऋग्वेदः १.१६४.२५

३६. प्राणो वै अर्कः - शतपथब्राह्मणम् - १०.४.१.२.३
प्राणो वै मधुः - शतपथब्राह्मणम् - १०.४.१.२३

३७. एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्य धारिणी ॥ मुण्डकोपनिषद् २.१.३

३८. मुण्डकोपनिषद् २.१.३

३९. प्रश्नोपनिषद् ३.३

४०. "तौ वा एतौ द्वौ संवर्गो वायुरेव देवेषु प्राणः प्राणेषु ।" छान्दोग्योपनिषद् ४.३.४
प्राणःचक्षु प्राणं श्रोत्रं प्राणंमनः प्राणो ह्येवैतान्सर्वासंवृक्त इति । छान्दोग्योपनिषद् ४.३.३

४१. "अथ ह प्राणा अहंश्रेयसि व्यूदिरेऽहं श्रेयानस्म्यहं श्रेयानस्मीति ।" छान्दोग्योपनिषद् ५.१.६

४२. प्रश्नोपनिषद् २.२.४

४३. एषोऽग्निस्तपत्येषसूर्य एष पर्जन्यो मधवानेषवायुः एष पृथिवी रयिर्देवः सदसच्चामृतं च यत् । प्रश्नोपनिषत् २.५

४४. छान्दोग्योपनिषत् - ५.१.१२; बृहदारण्यकोपनिषत् ६.१.१३; ६.१.१,७

४५. "यथा सम्राडेवाधिकृतान्विनियुङ्क्त एतान्ग्रामानेतान्ग्रामानधितिष्ठस्वेत्येवमेवैष प्राण इतरान्प्रांणान्पृथक्पृथगेव संनिधत्ते" । प्रश्नोपनिषत् ३.४

४६. "प्राणोऽपानोव्यान उदानः समानोऽन इत्येतत्सर्वं प्राणा ।" बहदारण्यकोपनिषत् - १.५.३

"पञ्च प्राणोर्मि पञ्चबध्यादिमूलाम् "। श्वेताश्वतरोपनिषद् १.५

४७. "पायूपस्थेऽपानं चक्षुः श्रोत्रे मुखनासिकाभ्यां प्राणः स्वयं प्रातिष्ठते मध्ये त समानः, एष ह्येतद्धुतमन्नं समं नयति ।" प्रश्नोपनिषत् - ३.५

४८. "प्रजापतिश्चरसि गर्भे त्वमेव प्रतिजायते । तुभ्यं प्राणप्रजास्त्विमा बलिं हरन्ति यः प्राणैः प्रतितिष्ठति । देवानामसि वह्नितमः पितृणां प्रथमास्वधा । ऋषीणां चरितं सत्यमथर्वाङ्गिरसामसि ।" - प्रश्नोपनिषद् २.७.८

४९. प्रश्नोपनिषद् २.९

५०. प्राणो ह्येष यः सर्वभूतैर्विभाति । - मुण्डकोपनिषद् ३.१.४

५१. प्राण इति होवाच सर्वाणि ह वा इमानि भूतानि प्राणमेवाभिसंविशन्ति प्राणमभ्युज्जिहते । छान्दोग्योपनिषद् - १.११.५

५२. सहोवाच विजानाम्यहं यत्प्राणो ब्रह्म । छान्दोग्योपनिषद् ४.१०.५

५३. प्राणः एव ब्रह्मणश्चतुर्थः पादः । - छान्दोग्योपनिषद् - ३.१८.४

५४. प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहाति । बृहदारण्यकोपनिषद् - ४.१.३

५५. बृहदारण्यकोपनिषद् - ३.९.१० - १७

५६. एतस्माज्जायते प्राणो मनः सर्वेन्द्रियाणि च ।
खं वायुर्ज्योतिरापः पृथिवी विश्वस्यधारिणी ॥ मुण्डकोपनिषद् २.१.३

५७. कठोपनिषद् - द्वितीयोऽध्यायः मन्त्र संख्या ७ (शाङ्करभाष्यम्)

५८. प्रश्नोपनिषद् (शाङ्करभाष्यम्) ६.४

५९. स एष वैश्वानरो विश्वरूपः प्राणोऽग्निरूदयते ।
प्रश्नोपनिषद् (शाङ्करभाष्यम्) - १.७

६०. प्राणस्येदं वशे सर्वं त्रिदिवे यत्प्रतिष्ठितम् ।

मातेव पुत्रान्रक्षस्व श्रीश्च प्रज्ञां च विधेहि न इति । प्रश्नोपनिषद् २.१३

६१. प्राणस्य वै सम्राट् कामायायाज्यं ...... प्राणो वै सम्राट् परमं ब्रह्म नैनं प्राणो जहति । बृहदारण्यकोपनिषद् - ४.१.३

६२. आगाता ह वै कामानां भवति एतदेवं विद्वानक्षरमुद्गीथमुपास्त इत्यध्यात्मम् । छान्दोग्योपनिषद् १.२.१४

६३. य एवं विद्वान् प्राणं वेद न हास्य प्रजा हीयतेऽमृतो भवति तदेष श्लोकः ॥ - प्रश्नोपनिषद् - ३.११

६४. तद्धैतत्सत्यकामो जाबालो गोश्रुतये वैयाघ्रपद्यायोक्त्वोवा यद्यप्येनच्छुष्काय स्थाणवे-- पुरोहेयुः

६५. पलाशानीति ॥ छान्दोग्योपनिषद् ५.२.३

६६. अथर्ववेदः ११.४.११

६७. ११.४.१५

६८. तैत्तिरीयब्राह्मणम् - १०.३६.१
महानारायणोपनिषद् - १६.१

६९. तैत्तिरीयब्राह्मणम् - २.५.११

७०. यजुर्वेदः - ९.२१; १८.२९; २२.२३

७१. मैत्रायणी संहिता - १.९.१; तैत्तिरीयारण्यकम् - ३.१.१

७२. तैत्तिरीयारण्यकम् - ८.३.१; तैत्तिरीयोपनिषद् - २.३.१

७३. प्रश्नोपनिषद् - १.१

७४. केनोपनिषद् - १.१

७५. केनोपनिषद् - १.९

७६. योऽसावसौ पुरुषः सोहमस्मि । - ईशावास्योपनिषद् - १६
योऽसावादित्ये पुरुषः सोऽसावहम् । यजुर्वेदः ४०.१७

७७. यः प्राणे तिष्ठन्प्रषादन्तरो यं प्राणो न वेद यस्य प्राणः शरीरं प्राणमन्तरो यमयत्येष त आत्माऽन्तर्याम्यमृतः । बृहदारण्यकोपनिषद् - ३.७.१६

७८. ऐतरेयोपनिषद् १.१.४

७९. प्राणो वैरं प्राणे हीमानि सर्वाणि भूतानि रमन्ते । बृहदारण्यकोपनिषद् - ५.१२.१

८०. उक्थं प्राणो वा उक्थं प्राणो हीदं सर्वमुत्थापयति । बृहदारण्यके प. ५.१३.१

८१. यजुः प्राणो वै यजुः प्राणे हीमानि सर्वाणि भूतानि युज्यज्ते । बृहदारण्यके ५.१३.२

८२. साम प्राणो वै साम प्राणे हीमानि सर्वाणि भूतानि सम्याञ्चि । बृहदारण्यके ५.१३.३

८३. क्षत्रं प्राणो वै क्षत्रं प्राणो हि वै क्षत्रं त्रायते । बृहदारण्यकोपनिषद् - ५.१३.४

८४. बृहदारण्यकोपनिषद् - १.३.१९

८५. छान्दोग्योपनिषद् - ६.८.६

८६. छान्दोग्योपनिषद् - ४.३.३

८७. मुण्डकोपनिषद् २.२.११